# Shri Nilastotram

# શ્રીનીલસ્તોત્રમ્ અથવા ચન્દ્રકૃતં નીલનાગરાજસ્તોત્રમ્

## Document Information

Text title : nIlastotram

File name : nIlastotra.itx

Category : deities_misc, nIlamatapurANa

Location : doc_deities_misc

Transliterated by : Ankur Nagpal ankurnagpal108 at gmail.com

Proofread by : Ankur Nagpal, NA, PSA Easwaran

Source : Nilamata Purana Verses 442-460

Latest update : March 18, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીનીલસ્તોત્રમ્ અથવા ચન્દ્રકૃતં નીલનાગરાજસ્તોત્રમ્

॥ અથ શ્રીનીલસ્તોત્રમ્ ॥

ચન્દ્રદેવ ઉવાચ -
નમસ્તે નાગરાજેન્દ્ર નીલ નીલોત્પલદ્યુતે ।
નીલમેઘચયપ્રેક્ષ નીલતોલકૃતાલય ॥ ૧॥

ફણાનાં ત્વં શતૈર્નાગ શૈભસે સપ્તભિઃ સદા ।
સપ્તસપ્તિરિવાર્ચિસ્માવ્રાજસે ત્વં ગભસ્તિભિઃ ॥ ૨॥

ત્વં નીલ નીલભ વિનીતપાપૈર્દેવેશ દેવૈરપિ નેક્ષ્યસે ત્વમ્ ।
નાગેન્દ્ર ભોગીન્દ્ર ઇવામ્બરસ્થો ધ્યાનેન્ વિદ્વદ્ભિરપીહમાનઃ ॥ ૩॥

ત્વં નીલ યોગેશ ઇવાસનસ્થો વેદાર્થવિદ્ભિર્વિવિધૈર્વિધાનૈઃ ।
સંસારકાર્યેષુ સુરાયકૃદ્ભિરારાધ્યસે મોક્ષફલાય વિપ્રૈઃ ॥ ૪॥

નાગેશ નીલાર્ચિરિવામરેશૈર્વિજ્ઞાયસે સૂર્ય ઇવામ્બરસ્થઃ ।
ત્વં નીલ નીલાર્ચિરિવોજ્જ્વલશ્ચ સુભક્તકાર્યાણિ વિધાસ્યમાનઃ ॥ ૫॥

દૃષ્ટો મયા કારણમેવ દેવ ભૂમીસકાશાત્પતતા બલેન ।
સ્મૃતોર્ચિતો મોચય મેઽતિદુઃખાત્ત્રાયસ્વ માં ભોગિપતે નમસ્તે ॥ ૬॥

ત્વં નીલ નીરૌઘચયપ્રકાશો વિરાજસે વિષ્ણુરિવામરેશઃ ।
વિધિર્વિધાતા રમસે ફણીશ ત્વાં વાસુદેવં પ્રણતોઽમિ નિત્યમ્ ॥ ૭॥

ત્વાં નીલનીલામ્બર નીલનત્રમાકાશવત્સર્વગતં સુરેશમ્ ।
ધ્યાયન્નરો યોઽપ્યજિતેન્દ્રિયો વા નાગેન્દ્ર મુચ્યેત તવ પ્રસાદાત્ ॥ ૮॥

નીલ ત્વામેવ વેદાર્થે જગુર્વેદાઃ સનાતનમ્ ।
દેવં બહુ મુમુક્ષૂણાં કામિનાં ચાર્તસાધનમ્ ॥ ૯॥

ત્વત્પ્રકાશં યતો બ્રહ્મ નિર્મલં નિષ્કલં પરમ્ ।
સૂક્શ્મતો વ્યોમનિર્દિષ્ટં સર્વગાત્રૈરકૃત્રિમમ્ ॥ ૧૦॥

અકિંચનો વદાન્યસ્ત્વમતિ સૂક્ષ્મોઽસિ ચ પૃથુઃ ।
અર્થાશ્રયો મહાર્થસ્ત્વં સ્તવ્યસ્તસ્યાક્ષરસ્ય ચ ॥ ૧૧॥

કુદ્રૂઃ પુત્ર સહસ્રેણ નાગરાજેન્દ્રશોભિતા ।
ત્વયા તુ રાજતેઽત્યર્થં વિષ્ણુનૈવાદિતિર્યથા ॥ ૧૨॥

ત્વમેવ તપસાઽત્યર્થં તથા વિદ્યોતસે પ્રભો ।
તોયં હિમં શીકરાંશ્ચ તથા મુઞ્ચસિ ધાર્મિક ॥ ૧૩॥

પ્રજાપતિઃ કશ્યપો હિ સર્વભૂતપિતા પ્રભુઃ ।
ત્વયા તુ શોભતેઽત્યર્થં પુત્રેણાત્યન્તધાર્મિકઃ ॥ ૧૪॥

ત્વયિ ધર્મશ્ચ સત્યં ચ ક્ષમા ચ સતતં પ્રભો ।
દેવાસુરવિમર્દેષુ શતશોઽથ સહસ્રશઃ ॥ ૧૫॥

ત્વયા વિનિહતા દૈત્યા દેવબ્રાહ્મણકણ્ટકાઃ ।
વરદસ્ત્વં વરેણ્યશ્ચ બલારિર્બલહા વિભુઃ ॥ ૧૬॥

ભક્તાનુકમ્પી ભક્તશ્ચ દેવ દેવે જનાર્દને ।
તસ્યાતિદયિતશ્ચાસિ યથા નાગઃ સ વાસુકિઃ ॥ ૧૭॥

ધનદસ્તે સખા નાગ યથા શર્વસ્ય નિત્યદા ।
ધનદશ્ચાસિ ભક્તાનાં ધનેશ ઇતિ વિશ્રુતઃ ॥ ૧૮॥

નાગાનાં ત્વં ગતિર્નિત્યં દેવાનામિવ વાસવઃ ।
ભક્તિમાનસ્મિ તે નિત્યં ત્વં ચ જાનાસિ ધાર્મિક ॥ ૧૯॥

॥ ઇતિ શ્રીનીલમતપુરાણે નીલસ્તોત્રમ્ અથવા ચન્દ્રકૃતં નીલનાગરાજસ્તોત્રમ્
સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ankur Nagpal ankurnagpal108 at gmail.com
NA, PSA Easwaran

*Shri Nilastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*